# उद्धवसन्देशः[1]

Version 0.1

## रूपगोस्वामिविरचितः

March 17, 2001

[1]Based on the edition in the *Kāvyasaṅgraha* edited by Jīvānanda Vidyāsāgara. (Calcutta: Jīvānanda Vidyāsāgara, 1888) Compared with citations in the Haridāsa Dāsa edition of the *Ujjvala-nīlamaṇi* with Viṣṇu Dāsa's commentary. (Navadvīpa: Haribola Kuṭīra, 2nd ed., Gaurābda 478 [1964]

सान्द्रीभूतैर्नवविटपिनां पुष्पितानां वितानै-
र्लक्ष्मीवत्तां दधति मथुरापत्तने दत्तनेत्रः ।
कृष्णः क्रीडाभवनवडभीमूर्ध्नि विद्योतमानो
दध्यौ सद्यस्तरलहृदयो गोकुलारण्यमैत्रीम् ॥१ ॥

श्वासोल्लासैरथ तरलितस्थूलनालीकमालः
कुर्वन् पूर्णानयनपयसां चक्रवालैः प्रणालीः ।
स्मारं स्मारं प्रणयनिविडां वल्लवीकेलिलक्ष्मीं
दीर्घोत्कण्ठाजटिलहृदयस्तत्र चित्रायितोऽभूत् ॥२ ॥

अन्तःस्वान्ते क्षणमथ परामृष्य पाराभिलाषी
कष्टाम्भोधेर्भवनशिखरे कुट्टिमान्तर्निविष्टः ।
सोत्कण्ठोऽभूदभिमतकथां शंसितुं कंसभेदी
नेदिष्टाय प्रणयलहरी बद्धवागुद्धवाय ॥३ ॥

त्वं सर्वेषां मम गुणनिधे बान्धवानां प्रधानं
त्वत्तो मन्त्रैः श्रियमविचलाम् यादवाः साधयन्ति ।
इत्याश्वासादभिमतविधौ कामये त्वां नियोक्तुं
न्यस्तः साधीयसि सफलतामर्थभारो हि धत्ते ॥४ ॥

संरम्भेण क्षितिपतिगिराम् लम्भिते गर्वितानां
वृन्दारण्यान्मयि मधुपुरीं गान्दिनीनन्दनेन ।
वल्लव्यस्ताः विरहदहनज्वालिकामण्डलीनां
अन्तर्लीनाण् कथमपि सखे जीवितं धारयन्ति ॥५ ॥

प्राणेभ्यो मे प्रणयवसतिर्मित्र तत्रापि राधा
धातुः सृष्टौ मधुरिमधराधारणादद्वितीया ।
वाचोयुक्तिस्तवकितपदैरद्य सेयं सखीनां
गाढाश्वासैर्विधुरविधरं प्राणभारम् बिभर्ति ॥६ ॥

गत्वा नन्दीश्वरशिखरिणो मेखलाम् रत्नभूतां
त्वं वल्लीभिर्वलयितनगां वल्लवाधीशपल्लीम् ।
तां दष्टाङ्गीं विरहफणिना प्राणयन् प्रीणयार्तां

वार्तामन्त्रध्वनिभिरथ मे मन्त्रिचूडामणीन्द्र ॥ ७ ॥

तिष्ठन्ति एते जगति बहवस्त्वत्विधानां विधातुं
चेतः पूर्तिं ननु जनपदामूर्तिभिर्मे सनाथाः ।
भूयो भूयः प्रियसख शपे तुभ्यमव्याजतोऽहं
भूरन्या मे हृदि सुखकरा गोष्ठतः कापि नास्ति ॥ ८ ॥

मद्विश्लेषज्वलनपटलीज्वालया जर्जराङ्गीः
सर्वे तस्मिन् निधनपदवीं शाखिनोऽप्याश्रयिष्यन् ।
गोपीनेत्रावलिविगलितैर्भूरिभिर्बाष्पवारां
पूरैस्तेषाम् यदि निरवधिर्नाभिषेकोऽभविष्यत् ॥ ९ ॥

आत्मक्लेशैरपि नहि तथा मेरुतुङ्गैर्व्यथन्ते
वल्लव्यस्ताः प्रियसख यथा मद्व्यथालेशतोऽपि ।
दुर्वारां मे विरहविहितां निह्नुवानस्तथापि
प्रेमग्रन्थिं त्वमतिपृथुलं तासु विख्यापयेथाः ॥ १० ॥

भ्रातर्नन्दीश्वरगिरिमितः यास्यतस्ते विदूरं
पन्थाः श्रीमान् अयमकुटिलः कथ्यते पथरूपी ।
प्रीये सद्यस्त्वयि निपतिते गोकुलानन्दसिन्धौ
सन्तस्तुष्टे सुहृदि हि निजां तुष्टिम् एवामनन्ति ॥ ११ ॥

अग्रे गौरीपतिमनुसरेः पत्तनान्तर्वसन्तं
गोकर्णाख्यं व्यसनजलधौ कर्णधारं नराणाम् ।
यस्याभ्यर्णे सह रविजया संगमो जङ्गमानां
आविष्कुर्वन्न् अभिमतधुरां धीर सारस्वतोऽसि ॥ १२ ॥

आरूढस्ते नयनपदवीं तन्निधन्यासि सोऽयं
गोपीनग्नं करणमुरलीकाकलीकः कलावान् ।
इत्यालापस्फुरितवदनैर्यत्र नारीकदम्बै-
र्दृग्भङ्गीभिः प्रथममथुरासंगमे चुम्बितोऽस्मि ॥ १३ ॥

तस्मादन्तर्विरचितपरानन्दपूराददूरां

याहि प्रीत्या सपदि पदवीमम्बिकाकाननस्य ।
यत्रानन्दोत्सवमकरवं सर्पतः सर्पताया
नन्दं विद्याधरमपि पुरा मोचयन् वल्लवीनाम् ॥ १४ ॥

भूयोभिस्त्वं किल कुवलयापीडदन्तावघातै-
रेतां निम्नोन्नतपरिसरां स्यन्दने वर्तमानः ।
मुञ्चोत्तुङ्गां मिहिरदुहितुर्धीरतीरान्तभूमिं
मन्दाक्रान्तां न खलु पदवीं साधवः शीलयन्ति ॥ १५ ॥

मुञ्चासव्ये विहगरुचिरं किंचिदस्मादुदञ्चं
राजत्तीरं नवसुमनसाम् राजिभिस्तीर्थराजम् ।
यत्रापूर्वं किमपि कलयां चक्रतुर्मत्प्रभावा-
दाभीराणां कुलमपि तथा गान्दिनीनन्दनोऽपि ॥ १६ ॥

यज्वानस्ते यदपि भवतः विप्रिया हेलनान्मे
नम्रस्तेषां तदपि भवनद्वाररथ्याम् जिहीथाः ।
गायन्तीनां मदनुरचितं तत्र विप्राङ्गनानां
आलोकाय स्पृहयसि न चेद् अध्वभावैर्जितोऽसि ॥ १७ ॥

तद्विख्यातं स्फुटविटपिनां मण्डलेनाभिपूर्णं
तूर्णं गच्छेः उपपुरिपुरः कोटिकाख्यं प्रदेशम् ।
यत्र प्राप्ते मयि विकिरती नेत्रमुद्यानपाली
शालीनापि प्रकटितभुजामूलमल्पम् जहास ॥ १८ ॥

इत्थं क्रान्त्वा पुरपरिसरान् याहि सट्टीकराख्यम्
पट्टीभूतम् भ्रमरनृपतेः पुष्पितारण्यमारात् ।
श्रीदामानं सुभग गडुरीकृत्य यत्राधिरूढः
क्रीडाकारी दधदुरुभुजां द्वादशाहं वसामि ॥ १९ ॥

मुग्धे श्यामः कलयति युवा पश्य माम् एव न त्वाम्
इति उल्लासैरहमहमिकां सर्वतः कुर्वतीभिः ।
यान् आलम्बी सरलनयनालोकमैत्रीभराणां
ग्रामीणाभिर्युवतिभिरहम् यत्र पात्रीकृतोऽस्मि ॥ २० ॥

मुञ्चन् सव्ये बहलबहुलां काननस्योपशल्यं
तं चोत्तुङ्गम् ह्रदपरिसरं दक्षिणे कालियस्य ।
फुल्लाभिस्त्वं पिहितमिहिरद्योतमन्तर्लताभि-
र्धीराध्वानं विमलसरसीराजिभाजम् भजेथाः ॥ २१ ॥

वल्लीचित्रं व्रजमृगहरं तं व्रजस्योपशल्ये
कल्ये क्रीडावनविहरणोत्कण्ठया गच्छतो मे ।
यत्रोदञ्चत् कलवलयितैर्वेणुगीतैर्मृगाणां
तूर्णम् राजीरजनिविरहव्याकुलानामहारि ॥ २२ ॥

आनम्राणाम् हसितमुकुलैः फुल्लगण्डस्थलानां
दूराद्वृष्टिं स्फुटसुमनसां स्यन्दने मुञ्चतीनाम् ।
ते वैदग्धीपरिमलकिरः यत्र सीमन्तिनीनां
सस्नुर्बाणावलिविलसिता रुद्धलक्षाः कटाक्षाः ॥ २३ ॥

स श्रीमान् प्रसवति रथी माधवः राधिकायाः
प्रेम स्थूलं करणकुटिलालोकभङ्गीविलासः ।
इति औत्सुक्याद्धरयुवतिभिः स्मारितोद्दामनर्मा
घर्माम्भोभिर्वृततनुरहम् यत्र चित्रायितोऽस्मि ॥ २४ ॥

लीलास्वप्नो मम विजयते यत्र नागेन्द्रभोगे
घोषस्तोत्रं तव जनयिता योजनद्वन्द्वचुम्बी ।
दिव्येनालं निखिलजगतीं सर्पिषा तर्पयन्ती
भ्रातर्भूम्ना विलसति विधेः गोमयी यत्र सृष्टिः ॥ २५ ॥

कक्षाम् लक्षावधिभिरभितः कासरोभिः परीतां
तां संनद्धव्रजविजयिनीं शाल्मलाख्याम् भजेथाः ।
वीथ्यां वीथ्यां पृथुकनिकरा यत्र मित्रानुवेलं
खेलन्तस्तान् अनुविदधते विक्रमान्मे क्रमेण ॥ २६ ॥

दूरादेष प्रणयति पुरा लब्धसाहारनामा
प्रेमानन्दं तव नयनयोः औपनन्दो निवासः ।
जङ्घालेन क्षितिपतिपुरीं स्यन्दनेनानुविन्दन्

यत्राहारं प्रियमकरवम् हारि हैयङ्गवीनं ॥ २७ ॥

गोपेन्द्रस्य व्रजपरिसरे लब्धतुष्टिर्लभेथा-
स्तां विख्यातां कलितमहिलाचारुहेलाम् रहेलाम् ।
यामासाद्य प्रहितमुरलीकाकलीदूतिकोऽहं
सायं गोपीकुलमकरवं सामि नेपथ्यनद्धम् ॥ २८ ॥

यत्र प्रीतान् अहमकरवं मित्रभावेन शावान्
हारम् हारं विदितसमयः वल्लवीतां दधीनि ।
शाखिव्रातः स खलु वलितः प्रीतशाराभिधस्ते
देशः क्लेशं पथिषु रथिनो दारयिष्यत्य् उदारम् ॥ २९ ॥

सोऽयम् रम्भानटनचटुलैः सेव्यमानो मरुद्भिः
कम्राशोकोत्तमसुमनसां निर्भरामोदधारी ।
पीयूषेण स्फुरितवसतिस्तामुदञ्चद्गुरुश्री-
र्लोकातीतः किल मदयिता वल्लवेन्द्रस्य लोकः ॥ ३० ॥

पश्यन्तीनां चकितचकितम् लब्धसङ्गं शताङ्गे
मामुत्तुङ्गव्यसनविसरैः काममुन्मादितानाम् ।
तासां विद्युत्तरलवपुषां वल्लवीनां प्रपाता-
द्विद्युत्कारीं कथयति जनो दक्षिणाम् यस्य कक्षाम् ॥ ३१ ॥

यत्राक्रूरः प्रणयनिविडोत्कट्ःअया गुण्ठितात्मा
रङ्गाङ्गोष्ठाङ्गणमनुसरन् मामलोकिष्ट बन्धुम् ।
तत्बाष्पाम्भः कुलपरिचयारब्धजृम्भैः कदम्बैः
सा संवीता विलसति तटी यत्र सौयात्रिकाख्या ॥ ३२ ॥

धावद्बालावलिकरतलप्रोच्चलद्बालधीनां
यत्रोत्तुङ्गस्फटिकपटलस्पर्धिदेहद्युतीनाम् ।
घ्रायं घ्रायं नवतृणशिखां मुञ्चतीनां वलन्ते
वत्सालीनां चटुलपटुलं शश्वदाटीकनानि ॥ ३३ ॥

आभीरीणां नयनसरणीसङ्गमादेव तासां

सद्यो मोट्टायितमधुरिमोल्लासभङ्गीविघाता ।
पीठीभूतो मम परिमलोद्गारगोष्ठो गरीयान्
यत्रास्थानीमनुविजयते पाण्डुरो गण्डशैलः ॥ ३४ ॥

रेणुर्नायं प्रसरति गवां धूमधारा कृशानो-
र्वेणुर्नासौ गहनकुहरे कीचकः रोरवीति ।
पश्योन्मत्ते रविरभिययौ नाधुनापि प्रतीचीं
मा चाञ्चव्यं कलय कुचयोः पत्रवल्लीं तनोमि ॥ ३५ ॥

दूरे वंशीध्वनिरुदयते हन्त मा धाव ताव-
द्धूम्रेदानीमपि नहि गवाम् लक्ष्यते धूमलेखा ।
अस्ति द्वारे गुरुरपि ततो लम्बितां स्तम्भयन्ती
क्षीरे नीवीं त्वमिह तरसा याहि गेहान्तरालम् ॥ ३६ ॥

आप्रत्यूषादपि सुमनसां वीचिभिर्ग्रथ्यमाना
धत्ते नासौ सखि कथमहः वैजयन्ती समाप्तिम् ।
धिन्वन् गोपीनयनशिखिनः व्योमकक्षाम् जगाहे
सोऽयं मुग्धे निविडधवलो धूलिचक्राम्बुवाहः ॥ ३७ ॥

अस्मिन् भूयः विसृमरवपुःसौरभे सौरभेयी
धूलेः जालैः शवलितशिरो मालतीचक्रवाले ।
अन्तर्गोष्ठं प्रविशति हरौ हन्त कस्या न चेत-
स्तृष्णां धत्ते जरति मुखरे किं वृथा रारटीषि ॥ ३८ ॥

मा मन्दाक्षं कुरु गुरुजनाद्देहलीं गेहमध्या-
देहि क्लान्ता दिवसमखिलम् हन्त विश्लेषतोऽसि ।
एष स्मेरो मिलति मृदुले वल्लवीचित्तहारी
हारी गुञ्जावलिभिरलिभिर्लीढगन्धो मुकुन्दः ॥ ३९ ॥

सौरिगोष्ठाङ्गणमनुसरन् शिञ्जितैरेव मुग्धः
किङ्किण्यास्ते परिहर दृशोस्ताण्डवं मण्डिताङ्गि ।
आराद्गीतैः कलपरिमिषन्माधुरीकैः कुरङ्गे
लब्धे सद्यः सखि विवशतां वागुरां कस्तनोति ॥ ४० ॥

यान्त्या लीलोद्भटकलतुलाकोटि सद्यस्त्वयासौ
लब्धा चन्द्रावलि सखि कुतः शब्दभेदाख्यविद्या ।
पश्योपेन्द्रः सदनपदवीं वल्लवैन्द्रस्य मुञ्चन्
अन्तर्भिन्नो मुहुरिह यया सम्भ्रमाद्भम्भ्रमीति ॥ ४१ ॥

सा सोत्कण्ठं वसति वसतेः वत्सला द्वारि देवी
वल्लीस्तोमैः क्षणमिह मुखाम्भोजलक्ष्मीं विधेहि ।
दूराच् चेतोमणिमपहरन् एष भव्याङ्गि दिव्यो
बिब्बोकस्ते मुरविजयिनः वर्त्म पाती बभूव ॥ ४२ ॥

यष्टिर्भूमौ लुठति तरसा श्रंसते पश्य वंशी
कंसारातेः स्खलनममलं शृङ्गमङ्गीकरोति ।
दूरान्नन्दः कलयति पुरो ह्रेपयामुं न राधे
बन्धे देवि स्थगय चपलापाङ्गभङ्गीवितानम् ॥ ४३ ॥

तिष्ठन् गोष्ठाङ्गणभुवि मुहुर्लोचनान्तं विधत्ते
जातोत्कण्ठस्तव सखि ःअरिर्देहलीवेदिकायाम् ।
मिथ्यामानोन्नतिकवलिते किं गवाक्षार्पिताक्षी
स्वान्तम् हन्त ग्लपयसि बहिः प्रीणय प्राणनाथम् ॥ ४४ ॥

पश्य व्रीदां सकपटमसौ तन्वती नः पुरस्ता-
द्वारे गौरी न सरति मुहुः शौरिणाकारितापि ।
आकृष्टाया गहनकुहरे वेणुविद्याविनोदै-
र्जानाति अस्याः पुनोऽनुपमं विक्रमं कुञ्जवीथी ॥ ४५ ॥

इत्थं साचिस्मितरुचिभृताम् यत्र संध्यानुबन्ध
मामुद्दिश्य स्मरपरिमलम् बिभ्रतीनामदभ्रम् ।
पौनःपुन्याद्विविधहृदयोत्तुङ्गभावानुसङ्गी
लीलाजल्पः कुवलयदृशां प्रेमपूर्णः पुरासीत् ॥ ४६ ॥

दामाकृष्टिद्विगुणितकरारण्यविद्योतितानां
घर्माम्भोभिर्दरवलयितस्मेरगण्डस्थलानाम् ।
भालोपान्तप्रचलतलकश्रेणिभाजां मदीयैः

कीर्तिस्तोमैर्मुखरितमुखाम्भोजलक्ष्मीभराणाम् ॥ ४७

हेलाचञ्चद्वलयरणितग्रन्थितैर्मन्थनीनां
ध्वानोन्मिश्रैर्मसृणमसृणं मन्थतीनां दधीनि ।
गीतैस्तासां कुवलयदृशम् यत्र रात्रेः विरामे
प्रेमोत्तानैर्मम समजनि स्वप्नलीलासमाप्तिः ॥ ४८ ॥

निर्माय त्वं वितर फलकम् हारि कंसारिमूर्त्या
वारं वारं दिशसि यदि मां माननिर्वाहनाय ।
यत् पश्यन्ती भवनकुहरे रुद्धकर्णान्तराहं
साहंकारा प्रियसखि सुखम् यापयिष्यामि यामम् ॥ ४९ ॥

सन्ति स्फीता व्रजयुवतयस्त्वत्विनोदानुकूला
रागिणि अग्रे मम सहचरी न त्वया घट्टनीया ।
दृष्ट्वाभ्यर्णे शठकुलगुरुं त्वां कटाक्षार्धचन्द्रान्
भ्रूकोदण्डे घटयति जवात् पश्य संरम्भिणी इयम् ॥ ५० ॥

मा भूयस्त्वं वद रविसुतातीरधूर्तस्य वार्तां
गन्तव्या मे न खलु तरले दूति सीमापि तस्य ।
विख्याताहम् जगति कठिना यत् पिधत्ते मदङ्गं
रोमाञ्चोऽयं सपदि पवनो हैमनस्तत्र हेतुः ॥ ५१ ॥

कामं दूरे वसतु पटिमा चाटुवृन्दस्तत्रायं
राज्यं स्वामिन् विरचय मम प्राङ्गणं मा प्रयासीः ।
हन्त क्लान्ता मम सहचरी रात्रिम् एकाकिनी इयं
नीता कुञ्जे निखिलपशुपीनागरोज्जागरेण ॥ ५२ ॥

मेदिन्यां ते लुठति दयिता मालती म्लानपुष्पा
तिष्ठन् द्वारे रमणिविमनाः खिद्यते पद्मनाभः ।
त्वं चोन्निद्रा क्षपयसि निशाम् रोदयन्ती वयस्या
माने कस्ते नवमधुरिमा तं तु नालोकयामि ॥ ५३ ॥

मद्वक्त्राम्भोरुहपरिमलोन्मत्तसेवानुबन्धे

पत्युः कृष्णभ्रमर कुरुषे किंतरामन्तरायम् ।
तृष्णाभिस्त्वम् यदि कलरुतव्यग्रचित्तस्तताग्रे
पुष्पैः पाण्डुच्छविमविरलैर्याहि पुंनागकुञ्जम् ॥ ५४ ॥

अत्रायान्तं चलमपि हरिम् लोकयन्ती बलिष्ठां
त्वामालम्ब्य प्रियसखि घने नास्मि कुञ्जे निलीना ।
अस्मान् मुग्धे हृदयनिहितादद्य पीताम्बरात्ते
वक्रो नान्यः कुचपरिचये मत्पुरो मा व्यथिष्ठाः ॥ ५५ ॥

मां पुष्पाणामवचयमिषाद्दूरमानीय कुञ्जं
स्मित्वा धूर्ते किमिति रभसादुच्चकैर्गायसि त्वम् ।
शङ्कामन्तर्न रचय मुधा गीतं तनोमि
स्फीतं वृन्दावनभुवि मुहुः कृष्णसारोत्सवाय ॥ ५६ ॥

वारंआरं व्रजसि सलिलच्छद्मना पद्मबन्धोः
पुत्रीम् ज्ञातस्तव सखि रसं पुण्डरीके क्षणोऽसौ ।
चेतः काम्या भवति विशदासारसाली न वामे
तेन स्मेरं मुहुरभिलषामि अच्युतम् रक्तपद्मम् ॥ ५७ ॥

पश्यामि अन्तर्विहितवसतिं त्वामरालाङ्गनानां
अत्र चौरे स्पृहयसि कथं कृष्णकण्ठग्रहाय ।
साधु ब्रूषे सखि मदकलो मां शिखण्डज्ज्वलः यं
कुञ्जे दृष्ट्वा भुजगदमनोद्दामदर्पोऽभ्युपैति ॥ ५८ ॥

बाले चन्द्रावलि नहि बहिर्भूय भूयः प्रदोषे
गेहाद्तृष्णावति कुरु पुरः कृष्णवर्त्मावलोकम् ।
सर्वस्यान्तर्जडिमदमने पावके नाद्य लब्धे
मुग्धे सिद्धिर्मम रसवती प्रक्रिया न प्रयाति ॥ ५९ ॥

हस्तेनाद्य प्रियसखि लसत्पुष्कराभेन दूरात्
कृष्णेनाहं मदकलदृशा कम्पिताङ्गी विकृष्टा ।
नीचैर्जल्प भ्रमति पुरतो भ्रान्तचित्ते गुरुस्ते
हूं कालिन्दौ पुलिनविपिने दीप्रदन्तीश्वरेण ॥ ६० ॥

वृन्दारण्ये मम विदधिरे निर्भरोत्कण्ठितानि
क्रीडोल्लासैः सपदि ःअरिणा हा मया किं विधेयम् ।
ज्ञातं धूर्ते स्पृहयसि मुहुर्नन्दपुत्राय तस्मै
मा शङ्किष्ठाः सखि मम रसो दिव्यसारंगतोऽभूत् ॥ ६१ ॥

इत्थंभूता बह्विधपदारम्भगम्भीरगर्भा
कर्णानां मे स्फुटतरतया कोटिभिः पातुमिष्टा ।
आसीत्तासां प्र्यसख पुरा यत्र कल्याणवाचां
प्रेमोल्लासप्रकटनकला कर्मठा नर्मगोष्ठी ॥ ६२ ॥

केयं श्यामा स्फुरति सरले गोपकन्या किमर्थं
प्राप्ता सख्यं तव मृगयते निर्मितासौ वयस्या ।
आलिङ्गामूं मुहुरिति तथा कुर्वती मां विदित्वा
नारीवेशम् ह्रियमुपययौ मानिनी यत्र राधा ॥ ६३ ॥

यत्रोत्तुङ्गाः करपरिचयं शश्वदासेदिवांसो
भूयांसो मे विमलदृषदां कल्पिता मण्डलीभिः ।
बन्धायोद्यत्तरलतरसां तर्णकानां निखाताः
कीलाः कूलस्थलवलयिनो भान्ति पद्माकराणाम् ॥ ६४ ॥

नो जानीमः कठिनविधिना मद्विधानां कपाले
गोपालीनां किल विलिखिता कीदृशी वर्णलेखा ।
यः संध्यायां सुमुखि मिलितो गोकुले राजदूतः
सोऽयं कर्णे निभृतनिभृतं माधवं वावदीति ॥ ६५ ॥

एष क्षत्ता व्रजनरपतेः आज्ञया गोकुले अस्मिन्
बाले प्रातो नगरगतये घोषणामातनोति ।
दुष्टम् भूयः स्फुरति च बलादीक्षणं दक्षिणं मे
तेन स्वान्तं स्फुटति चटुलम् हन्त भाव्यं न जाने ॥ ६६ ॥

प्रातः यात्रां नरपतिपुरे तथ्यमाकर्ण्य शौरे-
रायामाय प्रियसखि मया यामिनी प्रार्थिताभूत् ।
पश्य क्षिप्रं प्रथितलघिमा पापिनी इयं प्रभाता

जायन्ते हि प्रचुर्तमसो नानुकूलाः परेषु ॥ ६७ ॥

यावद्भक्तिं न किल भजते गान्दिनेयानुबन्ध-
स्तावन्नत्वा सुमुखि भवतीं किंचिदभ्यर्थयिष्ये ।
पुष्पैर्यस्या मुहुरकरवं कर्णपूरान्मुरारेः
सेयं फुल्ला गृहपरिसरे मालती पालनीया ॥ ६८ ॥

नावैषि त्वं पतितमशनिं मूर्ध्नि निर्मीयमाणाम्
एनां कस्ते सखि शिखरिणीम् हन्त पाता हतासि ।
तूर्णं मुग्धे बहिरनुसर प्राङ्गणं गेहमध्या-
दध्यारूढो जिगमिषुरसौ स्यन्दनं नन्दसूनुः ॥ ६९ ॥

आसीदार्ये पशुपपटलीमन्तरा नान्तरायः
प्रापुः पापा न च विकलतां पादभङ्गैस्तुरङ्गाः ।
ध्वस्तो नाभूदयमपि मनाक् स्यन्दने चक्रबन्धः
सत्यं गन्ता मधुपुरमसौ हन्त किं केशिहन्ता ॥ ७० ॥

आरादग्रे कलय नृपतेः दूत निर्धूतलज्जा
सज्जा तन्वी किमपि विषमं साहसं कर्तुमिच्छुः ।
यानाद्यावद्विसृजसि पुरः चन्द्रहासं न कृष्णं
हस्ताद्तावद्विसृजति सखी चन्द्रहासं न कृष्णम् ॥ ७१ ॥

मुग्धे पश्य क्षणमपि हरिं नेत्रमुन्मीलयन्ती
मोहेन त्वं विरचय मुहुर्नात्मनः वञ्चनानि ।
शृण्वन् काकूत्करमपि पुरो हन्त सीमन्तिनीनां
क्रूरस्तूर्णं विनुदति रथं दूरमाक्रूरनामा ॥ ७२ ॥

पश्य क्षामोदरि तव मुखालोकजन्मा हि शोको
वारं वारम् ःअरिनयनयोर्बाष्पमन्तस्तनोति ।
धावत्वाजिस्फुरदुरुखुरोत्तानितानां वितानो
धूलीनां तु श्रयति विसरन् एष मिथ्याकलङ्कः ॥ ७३ ॥

कृष्णं मुष्णन् अकरुणबलाद्गोपनारीवधार्थी

मा मर्यादाम् यदुकुलभुवाम् भिन्धिरे गान्दिनेयः ।
इति उत्तुङ्गा मम मधुपुरे यात्रया तत्र तासां
वित्रस्तानां परिववलिरे वल्लवीनां विलापाः ॥ ७४ ॥

शश्वन्नीराहरणकपटप्राप्तगोपालनारी
गूढक्रीडावसतिनिविडच्छायकुञ्जोपगूढः ।
यत्रादूरे विलसति महान् बद्धरोलम्बसद्मा
पद्मामोदस्नपितपवनः पावनाख्यस्तडागः ॥ ७५ ॥

लीलाक्रान्तैर्मुरविजयिनः सर्वतः पादपातै-
र्वैलक्षण्यं किमपि जगतामन्तः आकर्षि नीताः ।
एते नन्दीश्वरपरिसरा नेत्रवीथीम् भजन्त-
स्तीव्रं मातः किमपि दहनं चेतसि ज्वालयन्ति ॥ ७६ ॥

अस्ति प्रेम्णां त्वयि परिमलो मांसलः कंसशत्रो-
रद्य श्वः वा स तव भविता हारिहारानुकारी ।
दम्भोलीनामपि सुवदने गर्भनिर्भेददक्षै-
रेभिः कामं किमु विलपितैर्बान्धवान् दन्दहीषि ॥ ७७ ॥

मा कार्पण्याद्विरचय वृथा बाष्पमोक्षम् हताशे
कृष्णाश्लिष्टां तनुमनुपमां स्वैच्छया न त्यजामि ।
ज्वालस्तीव्रः विरहदहनादाप्तजन्मा बलान्मे
मर्मोन्माथी लघुतरमिमां पातयन् दन्दहीति ॥ ७८ ॥

कारुण्याब्धौ क्षिपसि जगतीम् हा किम् एभिर्विलापै-
र्धेहि स्थैर्यं मनसि यदभूरध्वगे बद्धरागा ।
स्मृत्वा वाणीमपि यदि निजां सव्रजं नाजिहीते
धूर्तोऽस्माकं त्रिजगति ततस्तन्वि निर्दोषताभूत् ॥ ७९ ॥

क्वायं गन्ता मधुरिपुरितो गोकुलादस्मदीयः
काले वंस्ये सुखमिति मया हन्त मानः व्यधायि ।
का जानीते यदिह खलताचातुरीदीक्सितेन
प्रेक्षेप्तव्यं शिरसि कुलिशं गान्दिनीनन्दनेन ॥ ८० ॥

न क्षोदीयान् अपि सखि मम प्रेमगन्धो मुकुन्दे
क्रन्दन्तीं मां निजशुभगताख्यापनाय प्रतीहि ।
खेलत्वम्शीवलयिनमनालोक्य तं वक्त्रबिम्बं
ध्वस्तालम्बा यदहमहह प्राणकीटम् बिभर्मि ॥ ८१ ॥

आशापाशैः सखि नवनवैः कुर्वती प्राणबन्धं
जात्या भीरुः कति पुनोऽहं वासराणि क्षयिष्ये ।
एते वृन्दावनविटपिनः स्मारयन्तः विलासान्
उत्फुल्लास्तान् मम किल बलान्मर्म निर्मूलयन्ति ॥ ८२ ॥

सा विश्राम्यन् मनसिजधनुर्विभ्रमोद्बोधविद्या
चिल्लीवल्लिभ्रमिमधुरिमोद्दामसम्पद्भिरिष्टा ।
एतामार्तिं मम शमयिता स्मेरता सङ्कराङ्गी
प्रेमोत्तुङ्गाः किमु मुरभिदो भङ्गुरापाङ्गसङ्गी ॥ ८३ ॥

कामं दूरे सहचरि वरीवर्ति यत् कंसवैरी
न इदम् लोकोत्तरमपि विपद्दुर्दिनं मे दुनोति ।
आशाकीलो हृदि किल वृतः प्राणरोधी तु यो मे
सोऽयं पीडां निविडवडवावह्नितीव्रस्तनोति ॥ ८४ ॥

तत्र स्फीताधरमधुभरे शीतलोत्सङ्गसङ्गे
सौन्दर्येणोल्लसितवपुषि स्फारसौरभ्यपूरे ।
नर्मारम्भस्थपुट्तवचःकन्दले नन्दसूनौ
मोदिष्यन्ते मम सखि कदा हन्त पञ्चेन्द्रियाणि ॥ ८५ ॥

भिन्दन् अक्ष्णोः किल कलुषतां श्यामलः श्यामलाभि-
र्लिम्पन्तीभिर्गिरिपरिसरं माधुरीणां छटाभिः ।
आविर्भावी गुरुतरचमत्कारभाजः कदा मे
खेलन् अग्रे निखिलकरुणनन्दनो नन्दसूनुः ॥ ८६ ॥

आनम्रायां मयि निजमुखालोकलक्ष्मीप्रसादं
खेदश्रेणीविरचितमनो लाघवायां विधेहि ।
सेवाभाग्ये यदपि न विभः योग्यता मे तथापि

स्मारं स्मारं तव करुणतापूरम् एवम् ब्रवीमि ॥ ८७ ॥

क्रीडातल्पे निहितवपुषः कल्पिते पुष्पजालैः
स्मित्वा स्मित्वा प्रणयरभसात् कुर्वतो नर्मभङ्गीम् ।
विन्यस्यन्ती तव किल मुखे पूगफालीं विधास्ये
कुञ्जद्रोण्यामहमिह कदा देव सेवाविनोदम् ॥ ८८ ॥

इति उन्नद्धः पशुपरमणीमण्डलीनां विलापै-
र्भूयो भूयः करुणकरुणैरद्य कीर्णान्तरस्य ।
उद्यत्बाष्पा त्यजति परितः रुद्धकर्णा कराभ्यां
दूरात् पान्थावलिरपि सुखे यस्य सीमोपकण्ठम् ॥ ८९ ॥

युक्तं शृङ्गीकनकनिकरालिङ्गिताङ्गैस्तुरङ्गै-
र्दृष्ट्वा नन्दीश्वरतटभुवि स्यन्दनं ते मिलन्तम् ।
मामाशङ्क्य स्फुटमुपगतं संनिधातव्यमारात्
धावन्तीभिस्तरलारलम् राधिकायाः सखीभिः ॥ ९० ॥

गोपालीनामपि वपुरलंकारलीलां दधानो
येषां नव्यः किसलयगणः रागिणं मां चकार ।
भ्राम्यत्भृङ्गावलिषु भवता तेषु शस्ताशिषां मे
वृन्दं वृन्दावनविटपिषु प्राज्ञविज्ञापनीयम् ॥ ९१ ॥

मत्ता वंशीनिनदमधुभिस्तूर्णगा स्तणकानां
ता मुञ्चन्त्यः प्रणयमभितः सस्नुरस्नुताक्ष्यः ।
तासामुच्चैः मम परिपठन् कामतो नामधेयं
क्षेमं पृच्छेस्त्वमथ निचये नीचकैर्नैचकीनाम् ॥ ९२ ॥

डिम्भव्यूहम् हतवति विधौ तत्तताह्वस्तत् अहं
स्तन्यम् यासां मधुरमधवं वत्सरं वत्सलानाम् ।
वारं वारं मम नतिगणान् विज्ञ विज्ञापयेथा
नम्रस्तासाम् जठरपशुपीमण्डलीनां पदेषु ॥ ९३ ॥

आमोदं मे मधुर दधिरे मामहंपूर्विकाभि-

दूरे यान्तं कुसुमितवनालोकनाय स्पृशन्तः ।
श्रीदामाद्याः प्रियसहचर्ओ हन्त मन्नामतस्ते
पौनःपुन्यान्निपुण भवता तुङ्गमालिङ्गनीयाः ॥ ९४ ॥

हत्वा रङ्गस्थलभुवि मया धीर कंसं नृशंसं
काकून्मिश्रैः शपथशतकैर्गोकुलं प्रेषितस्य ।
आनम्रस्त्वं चरणयुगलं वल्लवेन्द्रस्य कामं
नामग्राहं मम गुणनिधे वन्दमानो दधीथाः ॥ ९५ ॥

तां वन्देथा मम सविनयं नामतः क्षामगात्रीम्
आक्रोशन्तीं खलनरपतिं साङ्गुलीभङ्गमुच्चैः ।
अन्तश्चिन्ताविलुलितमुखीम् हा मतेकप्रसूतिं
सर्वाङ्गैस्त्वं कलितवसुधालम्बमम्बाम् यशोदाम् ॥ ९६ ॥

या निश्वासोद्गम्वलयिनम् हारवं मुञ्चमाना
खेदोदयं मम गुणकथामन्तरेणान्तरेण ।
क्षामीभूता क्षितिपतिपुरीवर्त्मविन्यस्तनेत्रा
बाष्पोद्गारस्नपितवसना वासराणि क्षिपन्ती ॥ ९७ ॥

अक्रूराख्ये हृतवति हठाज्जीवनं मां निदाघे
विन्दन्तीनामुहुरविरलाकारमन्तर्विदारम् ।
सद्यः शुष्यत्मुखवनरुहां वल्लवीदीर्घिकाणां
आसामासामृदमनुसृताः प्राणकूर्माः वसन्ति ॥ ९८ ॥

तासाम् बद्धाञ्जलिरनुसरैरन्तिकम् यन्त्रितात्मा
शङ्काभिस्त्वं क्रमपरिणमत्विक्रियाणां प्रियाणाम् ।
दूत्यं कुर्वन् असि गुणनिधे सापराधस्य यन्मे
भर्तुर्दोषादपि हि कुशल्ओ हन्त दुष्यन्ति भृत्याः ॥ ९९ ॥

मन्नेपथ्यस्तवकितभवत्वीक्षणेनाकुलानां
तुङ्गातङ्गोत्तरलितमनःकल्पनाजल्पभाजाम् ।
तिष्ठन् आसां पथि नयनयोः निःसलाकं गतानां
संदेशं मे लघु लघु सखे हारिनं व्याहरेथाः ॥ १०० ॥

यः कालिन्दीवनविहरणोद्दामकामः कलावान्
वृन्दारण्यान्नरपतिपुरं गान्दिनीयेन नीतः ।
कुर्वन् दूत्यं प्रणयसचिवस्तस्य गोपेन्द्रसूनो-
र्देवीनां वः सपदि सविधम् लब्धवान् उद्धवोऽस्मि ॥१०१ ॥

तापोन्नद्धश्वसितपटलीदूयमानाधरश्री-
र्मुक्तक्रीडो धवलिमधुराहिण्डिरक्षामगण्डः ।
स्मारं स्मारं गुणपरिमलम् हन्त वः क्लान्तचेताः
सोऽयं कान्तः किमपि सरलाः सुन्दरं संदिदेश ॥१०२ ॥

कच्चिद्भीतं न भजत मुहुर्दानवेभ्यः पुरावत्
कल्याणं वः सरलहृदयाः कच्चिदुल्लालसीति ।
कच्चिद्यूयं स्मरथ सरसं तत्र क्षित्तानुकूलं
कुञ्जे कुञ्जे कृतमथ मया तं च सेवाप्रपञ्चम् ॥१०३ ॥

नीतः यत्नाद्विविधविनयैर्बन्धनम् बन्धुताभिः
कर्तुम् भूयः किमपि कुशलं पत्तने वर्तमानः ।
ध्यायं ध्यायं नवनवमहं सौहृदं वः सुकण्ठ्यो
गाढोत्कण्ठक्लमपरवशं वासराणि क्षिपामि ॥१०४ ॥

ज्ञातम् ज्ञातं विरमत चिरं त्वादृशीनां चरित्रं
याभ्यस्तीव्रां समजनि मनोभेदिनी वेदनेयम् ।
चक्रुर्वक्रं मयि किल तथा प्रेमपूरम् भवत्यः
येनोद्भ्रान्तस्त्रुटिमपि बलादुत्सहे नाद्य नेतुम् ॥१०५ ॥

रासोल्लासान्निशि निशि चिरं स्वप्नवृन्दापदेशा-
द्वृन्दारण्ये सुरभिणि मया सार्धमास्वादयन्ते ।
भूयो भूयस्तदपि च परित्यागित्ओ दूषणं मे
शंसन्त्यः किं कुटिलहृदया न त्रपन्ते भवत्यः ॥१०६ ॥

ते ते चन्द्रावलि रसभरभ्रान्तनेत्रान्तमैत्री
वैचित्रीभिस्त्रिभुवनजये दत्तहस्तावलम्बाः ।
उत्सर्पन्तः स्मरणसरणीम् हन्त ते भ्रूविलासा

निःशङ्कं मे हृदयमधुना प्रांशवः श्रंसयन्ति ॥१०७ ॥

तत्तत्तन्वि स्मरसि विपिने फुल्लशाखे विशाखे
कर्षन्नीवीं तव मुहुरहं वीक्ष्य वृद्धां मिलन्तीम् ।
कल्याणीं मे वितर कितवे हन्त चेलान्तराले
गुप्तां गुञ्जावलिमिति वदन् यद्विलक्षस्त्ततासम् ॥१०८ ॥

तां वैदग्धीपरिमलकथामुद्गिरन्ती सखीषु
क्लान्तिं दूरे क्षपयसि निजाम् हन्त धन्यासि धन्ये ।
ध्यायन्नाहं तमिह नगरे देवि लोकं विलोके
प्रीत्या यत्र व्यसनविधुरं वक्तुमुन्मुद्रयामि ॥१०९ ॥

गम्भीराणि प्रमदगुरुभिर्गूढनर्मप्रबन्धै-
र्माध्वीकानां मधुरिममहाकीर्तिविध्वंसनानि ।
सोत्कण्ठं मे स्मरति हृदयं श्यामले कोमलानि
प्रेमोत्तुङ्गस्मितपरिचितानि अद्य ते जल्पितानि ॥११० ॥

पद्मे पद्मस्तुतसुखिलतासद्मनि छद्मनिद्रां
लब्धे लुब्धा मयि मुरलिकाम् हर्तुकामा त्वमासीः ।
धृत्वा पाणौ मुहुरथ मया कञ्चकं मुञ्चता ते
यत् प्रारब्धं किमपि तदिदं स्वान्तमन्तः पिनष्टि ॥१११ ॥

न्यस्ताङ्गी मे सुरभिनि भुजस्तम्भयोः अन्तराले
भूयोभिस्तम् रहसि ललिते केलिभिर्लालितासि ।
अन्तश्चिन्ताविधुरमधुना पाम्शुपुञ्जे लुठन्ती
हन्त म्लाना रचयसि कथं प्राणसंधारणानि ॥११३ ॥

यः सेवाभिर्मुदमुदयिनीं तत्र भद्राङ्गि भद्रे
नीतस्ताभिर्निशि निशि मनःकर्षिणीभिस्त्वयासीत् ।
स प्रेष्ठस्ते नवपरिचयादिङ्गितस्यानभिज्ञैः
कृष्णस्तुष्णीं पुरपरिजनैः सेव्यमानो दुनोति ॥११४ ॥

सोढव्यं ते कथमपि बलाच्चक्षुषी मुद्रयित्वा

तीव्रोत्तापम् हतमनसिजोद्दामविक्रान्तचक्रम् ।
द्वित्रैरेव प्रियसखि दिनैः सेव्यतां देवि शव्ये
यास्यामि त्वत्प्रणयचटुलभ्रूयुगाडम्बराणाम् ॥ ११५ ॥

इत्थं तासामनुनयकलापेशलः क्लेशहारी
संदेशं मे कुवलयदृशां कर्णपूरं विधाय ।
त्वं मत्चेतोभवनवडभीप्रौढपारावतीं तां
राधामन्तः क्रमकवलितां संभ्रमेणाजिहीथाः ॥ ११६ ॥

सा पल्यङ्के किशलयदलैः कल्पिते तत्र सुप्ता
गुप्ता नीरस्तवकिततृशां चक्रवालैः सखीनाम् ।
द्रष्टव्या ते कृशिमकलिताकण्ठनालोपकण्ठ
स्पन्देनान्तर्वपुरनुमितप्राणसङ्गा वराङ्गी ॥ ११७ ॥

मालां मैत्रीविदुरमदुरः सङ्गसौरभ्यसभ्यां
आसन्तीभिर्विरचितसुखीं पञ्चवर्णां गृहाण ।
आरूढायाः परिणतिदशां तादृशीं सारसाक्ष्याः
साक्षादेतत् परिमलम् ऋते कः प्रबोधे समर्थः ॥ ११८ ॥

माल्यामोदव्यतिकरबहिर्बोधितायाः सबाष्पं
नेत्रद्वन्द्वं दिशि दिशि मुहुर्विक्षिपन्त्याः विलक्षम् ।
तस्याः प्रोद्यत्पलककलिकादन्तुरायाः पुरस्ता-
न्मन्दं मन्दं विनयमसृणस्त्वं विनम्रो जिहीथाः ॥ ११९ ॥

धृत्वा मालां किशलयततेः अञ्चले न्यञ्चतङ्गी
भ्रूसंज्ञाभिः सपदि सचिवीकृत्य तस्या वयस्याः ।
दूत्यं स्वस्य प्रणयहृदयसत्त्वं निवेद्यानवद्यं
धीमन् सद्यो मम कथयितुं वाचिकं प्रक्रमेथाः ॥ १२० ॥

यः सर्वस्मात्तव किल गुरुस्त्वं च यस्यासि धीरे
प्राणेभ्यस्त्वं प्रणयवसतिर्यस्य यः स्यात्तवापि ।
स त्वां धृत्वा मनसि विधुरे हन्त संधुक्षमाणः
कृष्णस्तृष्णाचटुलचटुलं देवि संदेदिशीति ॥ १२१ ॥

सख्युर्लक्ष्मीमुखि मतमुरीकृत्य दूरीभविष्णो-
र्धत्ते प्राणान् अनुपदविपद्विद्धचित्तापि साध्वी ।
मुक्तच्छाया मुहुरसुमनाः क्षौणिपृष्ठे लुठन्ती
बद्धापेक्षं विलसति गते माधवे माधवी इयम् ॥१२२ ॥

नीते शोषं विरहरविणा सर्वतो हृत्तडागे
जाने कण्ठस्थलविलुठितप्राणमीनासि तन्वि ।
दूरे संप्रति अविरलसुहृत्मारुतैर्वारितोऽहं
कृष्णाम्भोधौ विलसतमृतालंकृतः किं करिष्ये ॥१२३ ॥

नायं स्वप्नो निशि निशि भवेद्यत्त्वया सङ्गतिर्मे
पद्मामोदं विधुमुखि निराबाधमास्वादयामि ।
किन्तु ज्ञातं त्वयि विजयते काचिदाकृष्टिविद्या
यां शंसन्ती हरसि तरसा मामदूराद्यदूनाम् ॥१२४ ॥

लब्धान्दोलः प्रणयरभसादेष ताम्रौष्ठि नम्रः
प्रम्लायन्तीं किमपि भवतीम् याचते नन्दसूनुः ।
प्रेमोद्दामप्रमदपदवी साक्षिणी शैलकक्षे
द्रष्टव्या ते कथमपि न सा माधवी कुञ्जवीथी ॥१२५ ॥

विन्दन् वंशीस्फुरितवदनो नेत्रवीथीमकस्मा-
दन्तर्बाधाकवलितधियो धातुभिर्धूमलोऽहम् ।
क्रीडाकुञ्जे लुठितवपुषः श्रान्तमानन्दधारा
कल्लोलैस्ते रहसि सहसोत्फुल्लमुल्लास्यिष्ये ॥१२६ ॥

प्रेमोन्नाहादहमधिवहन् बाष्पधारामकाण्डे
गण्डोत्सङ्गे स्मरपरिभवैः पाण्डुरे दत्तचुम्बः ।
कुर्वन् कण्ठग्रहविलसितं नन्दयिष्यामि सत्यं
सान्द्रेण त्वां सहचरि परिष्वङ्गरङ्गोत्सवेन ॥१२७ ॥

इत्थं तीव्रव्यसनजलधेः पारसीमामिवासां
संदेशैर्मे धृतगरिमभिर्दर्शयन् दूरदर्शी ।
भूयः कुर्वन् कुवलयदृशां तत्र चितानुकूलं

कालं कंचित्त्वमतुलमते गोकुलान्तर्नयेथाः ॥१२८ ॥

गोपेन्द्रस्य व्रजभुवि सखे केवलम् यात्रया ते
नार्थः सिद्ध्येन्मम बहुमतः किन्तु बाढं तव एव ।
प्रेमोल्लासं परिकलयतां गोपसीमन्तिनीनां
स्मर्तव्या मे सपदि भवता भारतीसारतेयम् ॥१२९ ॥

गोष्ठक्रीडोल्लसितमनसो निर्व्यलीकानुरागात्
कुर्वाणस्य प्रथितमथुरामण्डले ताण्डवानि ।
भूयः रूपाश्रयपदसरोजन्मनः स्वामिनोऽयं
तस्योद्दामं वहतु हृदयानन्दपूरं प्रबन्धः ॥१३० ॥

श्रीदामाद्यैः शिशुसहचरैर्बाल्यखेलामकार्षी-
द्गोपालीभिः सह युवतिभी रासकेलिं चकार ।
दुष्टान् दैत्यान् अपि बहुतरान् हेलया यो जघान
स श्रीकृष्णस्तरुणकरुणस्तारयेद्वो भवाब्धिम् ॥१३१ ॥

इति श्रीरूपगोस्वामिविरचित उद्धवसन्देशः